# brahmA rachita kRiShNastotra

# શ્રીકૃષ્ણસ્તોત્ર બ્રહ્મારચિત

## Document Information

Text title : brahmA rachita kRiShNastotra

File name : brahmakrishnastotra.itx

Category : vishhnu, krishna, stotra, vyAsa, vishnu

Location : doc_vishhnu

Author : Brahmadeva

Transliterated by : WebD

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Latest update : January 16, 2005

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીકૃષ્ણસ્તોત્ર બ્રહ્મારચિત

શ્રી ગણેશાય નમઃ ।
બ્રહ્મોવાચ ।
રક્ષ રક્ષ હરે માં ચ નિમગ્નં કામસાગરે ।
દુષ્કીર્તિજલપૂર્ણે ચ દુષ્પારે બહુસઙ્કુટે ॥ ૧॥

ભક્તિવિસ્મૃતિબીજે ચ વિપત્સોપાનદુસ્તરે ।
અતીવ નિર્મલજ્ઞાનચક્ષુઃપ્રચ્છન્નકારણે ॥ ૨॥

જન્મોર્મિસઙ્ગસહિતે યોષિન્નક્રૌઘસઙ્કુલે ।
રતિસ્રોતઃસમાયુક્તે ગમ્ભીરે ઘોર એવ ચ ॥ ૩॥

પ્રથમામૃતરૂપે ચ પરિણામવિષાલયે ।
યમાલયપ્રવેશાય મુક્તિદ્વારાતિવિસ્મૃતૌ ॥ ૪॥

બુદ્ધ્યા તરણ્યા વિજ્ઞાનૈરુદ્ધરાસ્માનતઃ સ્વયમ્ ।
સ્વયં ચ ત્વ કર્ણધારઃ પ્રસીદ મધુસૂદન ॥ ૫॥

મદ્વિધાઃ કતિચિન્નાથ નિયોજ્યા ભવકર્મણિ ।
સન્તિ વિશ્વેશ વિધયો હે વિશ્વેશ્વર માધવ ॥ ૬॥

ન કર્મક્ષેત્રમેવેદં બ્રહ્મલોકોઽયમીપ્સિતઃ ।
તથાપિ ન સ્પૃહા કામે ત્વદ્ભક્તિવ્યવધાયકે ॥ ૭॥

હે નાથ કરુણાસિન્ધો દીનબન્ધો કૃપાં કુરુ ।
ત્વં મહેશ મહાજ્ઞાતા દુઃસ્વપ્નં માં ન દર્શય ॥ ૮॥

ઇત્યુક્ત્વા જગતાં ધાતા વિરરામ સનાતનઃ ।
ધ્યાયં ધ્યાયં મત્પદાબ્જં શશ્વત્સસ્માર મામિતિ ॥ ૯॥

બ્રહ્મણા ચ કૃતં સ્તોત્રં ભક્તિયુક્તશ્ચ યઃ પઠેત્ ।
સ ચૈવાકર્મવિષયે ન નિમગ્નો ભવેદ્ધ્રુવમ્ ॥ ૧૦॥

મમ માયાં વિનિર્જિત્ય સ જ્ઞાનં લભતે ધ્રુવમ્ ।
ઇહ લોકે ભક્તિયુક્તો મદ્ભક્તપ્રવરો ભવેત્ ॥ ૧૧॥

॥ ઇતિ શ્રીબ્રહ્મદેવકૃતં શ્રીકૃષ્ણસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar at hotmail.com

---

*brahmA rachita kRiShNastotra*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*